संपूर्ण-संस्कृतम् (द्वितीय/तृतीय भाषा) 'आमोदः'। इयत्ता - दहावी

इयत्ता दहावीच्या प्रस्तावित आराखड्यानुसार कृतिपत्रिका क्र. २

**समयः - होरात्रयम् ।** **गुणाङ्काः - १००**


> **सूचना :**
> १) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
> २) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः ।
> ३) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।

## प्रथमः विभागः - सुगमसंस्कृतम् (१५)

**१) अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४)** ४


१. 
________

२. 
________

३. 
________

४. 

________

५. 
________

**आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत । (३ तः २)** २

१. १७ = ............... २.पञ्चपञ्चाशत् = ......... ३. ९१ = ...........

**इ) समय-स्तम्भमेलनं कुरुत।** २

| अ | आ |
|---|---|
| १. दशोन-पञ्चवादनम् | ६.३० |
| २. दशाधिक-नववादनम् | ८.४० |
| ३. सार्ध-षड्वादनम् | ४.५० |
| ४. चत्वारिंशदधिक-अष्टवादनम् | ९.१० |

**ई) वासर-तालिकां पूरयत । ( ३ तः २)** २

[ह्यः .......... ] ← [अद्य बुधवासरः] → [..... गुरुवासरः] → [परश्वः ......]

**उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. दन्त्यौ ।
२. अनुनासिके ।
३. आकारान्तस्य नामद्वयम् ।
४. इन्नन्तस्य नामद्वयम् ।
५. षष्ठ-गणस्य धातुद्वयम् ।
६. चतुर्थगणस्य धातुद्वयम् ।

## द्वितीयः विभागः – गद्यम् । (२२)

२) अ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ७

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

१. **अवबोधनम् । (४ तः ३)** ३

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

पृथुभूपेन स्वधनुः सज्जीकृतम् , यतः ------- १

१. सः शत्रुं हन्तुम् इच्छति स्म ।

२. सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म ।

**ख) पूर्णवाक्येन उत्तरत ।** १

पृथुराजः कुत्र भ्रमणम् अकरोत् ?

**ग) कः कं वदति ?** १

''स्तवनं तु ईश्वरस्यैव भवेत् ।''

**घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।** १

पृथुराजः प्रजाहितदक्षः नृपः ।

२. **शब्दज्ञानम् । (३ तः २)** २

क) २ सप्तम्यन्त-पदे चित्वा लिखत । १

ख) गद्यांशतः २ विशेषणे चित्वा लिखत । ------- , --------- प्रजाः । १

ग) पूर्वपदं लिखत । १

१. पशुवज्जीवन्ति = --------- + जीवन्ति ।

२. पुरोहितोऽवदत् = --------- + अवदत् ।

३. **पृथक्करणम् । क्रमेण योजयत ।** २

१. पृथुभूपस्य धनुःसज्जीकरणम् ।

२. पुरोहितस्य उपदेशकथनम् ।

३. भूमेः कृषिकार्यस्य उपदेशनम् ।

४. भूमेः स्त्रीरूपं धृत्वा प्रकटनम् ।

आ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ⑦

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत् । ''अम्ब! त्रायस्व । नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत–''अम्ब, इतःपरम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् – ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

**१. अवबोधनम् । (४ तः ३)** ③

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१. शङ्करः ............... (पितरं / मातरं ) संन्यासस्य महत्त्वम् अवाबोधयत् ।

२. आर्याम्बा पुत्रं ............. ( नक्रेण / मत्स्येन ) गृहीतम् अपश्यत् ।

**ख) पूर्णवाक्येन उत्तरत ।** १

शङ्करः किमर्थम् आक्रोशत् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।** १

आक्रोशं श्रुत्वा आर्याम्बा गृहं प्राप्ता ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)** ②


क) गद्यांशतः २ पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत । १

ख) प्रश्ननिर्माणं कुरुत । १

मरणात् पूर्वं संन्यासी भवितुम् इच्छामि ।

ग) इदानीमेव संन्यासं स्वीकुरु । (लकारं लिखत ।) १

**३. पृथक्करणम् । = जालरेखाचित्रं पूरयत ।** ②




[निरगच्छत्, प्राणमत्, अवाबोधयत्, अपठत् ।]

**इ) गद्यांशं पठित्वा सरलार्थं लिखत । (२ तः १)** ४

| | | |
|---|---|---|
| १. नदी(शुतुद्री) | – | विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद, कथं तव साहाय्यं कर्तव्यम् ? |
| विश्वामित्रः | – | अम्ब, शृणु मे अभ्यर्थनाम् । गाधा मे भविष्यसि? स्वल्पीभवतु जलौघः। येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुमः । |

| | | |
|---|---|---|
| २. दुष्यन्तः | – | (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः। |
| सूतः | – | तथा । (इति निष्क्रान्तः ।) |

**ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१. सुदासः किमर्थं कमलं विक्रेतुं न इच्छति ?

२. सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः ?

३. विश्वामित्रः नद्यौ किं प्रार्थयते ?

## तृतीयः विभागः – पद्यम्। (२०)

**३) अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

१. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।

२. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।

**१. पूर्णवाक्येन उत्तरत ।** १

का कार्यसाधिका भवति ?


**२. मञ्जूषातः योग्यं विशेषणं चित्वा लिखत ।** १

क) ................ रूपम् ।

ख) ............. वस्तूनाम् ।

(प्रच्छन्नगुप्तं; अल्पानां; अधिकं )

**३. पद्यांशं पठित्वा रेखाचित्रं पूरयत ।** २



आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । **४**

१. तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।
२. ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा बभञ्ज पतगोत्तमः ।।
३. ततः क्रोधाद्दशग्रीवो गृध्रराजमपोथयत् ।
पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोऽच्छिनत् ।।
४. स छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा ।
निपपात हतो गृध्रो धरण्यामल्पजीवितः ।।
५. कं संजघान कृष्णः का शीतलवाहिनी गङ्गा ।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।।

**१. पूर्णवाक्येन उत्तरत ।** १
अल्पजीवितः गृध्रः कुत्र निपपात ?

**२. सन्धिविग्रहं कुरुत ।** १
ततोऽस्य = .......... + ............ ।

**३. माध्यमभाषया उत्तरं लिखत । (२ तः १)** २
क) 'कं संजघान' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत ।
ख) जटायुरावणयोः सङ्घर्षस्य वर्णनं कुरुत ।

**इ) पद्ये शुद्धे पूर्णे च लिखत । ('क,ख' तः १, 'ग,घ' तः १)** **६**
क) भिक्षुः ............ वः ।। **अथवा** ख)निन्दन्तु ............. धीराः ।। ४
ग) यथा ............... कर्मणा ।। **अथवा** घ) उत्तमो ............ प्रजायते ।। २

**ई) अन्वयं पूरयत ।** २
कर्षकः क्षेत्रम् ............ यादृशं बीजं ............ (तादृशं फलं लभते) । (तथैव मनुष्यः ) सुकृते वा ............. वा अपि तादृशं (इष्टम् अनिष्टं वा ) ............ लभते ।

**उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** **४**

१. वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।
२. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।
३. मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।

## चतुर्थः विभागः – लेखनकौशलम् । (१५)

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**१. धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । ( ५ तः ३ )** ३
क) कुप् ( ४ प.प.) ख) रुच् ( १ आ.प.) ग) याच् ( १ आ.प.)
घ) स्निह् ( ४ प.प.) च) वि + रम् ( १ प. प. )

**२. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत । ( ४ तः २ )** २

क) रविः अपारनभसः पारं याति ।

ख) देशस्य उत्तरस्यां दिशि मानसं नाम तडागः वर्तते ।

ग) मम उत्तमाङ्गं उपचारपट्टिकाभिः विभूषितम् ।

घ) नूनं सः सुगतः एव अधिकतमं मूल्यं दद्यात् ।

**आ) ५ – ७ वाक्यात्मकं निबन्धं लिखत । ( ३ तः १)** ५

क) मम प्रियः उत्सवः । ख) भारतीयं प्रसिद्धं स्थलम् । ग) मम प्रिया भाषा ।


**अथवा**

**आ) ५ – ७ वाक्यात्मकं संवादं लिखत । ( ३ तः १)** ५

क) शाला-संवादः । ख) दूरवाणी-संवादः । ग) कार्यालय-संवादः ।

**इ) निर्दिष्टां कृतिं कुरुत ।**

मञ्जूषातः उचितशब्दान् चित्वा ५ – ६ वाक्यात्मकं चित्रवर्णनं कुरुत । ५




(गच्छति, पश्यति, खेलति, तरति, आलिखति, पठति, गृह्णाति, उपविशति )

**अथवा**

**इ) संस्कृतानुवादं कुरुत । ( ८ तः ५ )** ५

१. वसंत ऋतूत कोकिळ गातो.
वसंत ऋतु में कोयल गाता है ।
Cuckoo sings in spring season.

२. ‘उदयन’ नावाचा राजा होता.
‘उदयन’ नाम का राजा था ।
There was a king named Udayan .

३. आजोबा सकाळी ८ वाजता वर्तमानपत्र वाचतात.
नानाजी/दादाजी सुबह ८ बजे वर्तमानपत्र पढ़ते हैं ।
Grandfather reads newspaper at 8 O'clock in the morning.

४. भुंगे कमळाभोवती गुंजन करतात.
भँवरे कमल की चारों ओर गूँजतें हैं ।
Blackbees buzz around the lotus.
५. महेश रमेशला शोधतो.
महेश रमेश को ढूँढता है ।
Mahesh is searching for Ramesh.
६. तुम्ही सर्व दृश्यफलकावर चित्र पहा.
आप सब दृश्यफलकपर चित्र देखें ।
You all see the picture on moniter.
७. झाडाखाली २ कुत्रे बसले आहेत.
पेड़ के नीचे दो कुत्ते बैठे हैं ।
Two dogs sit under the tree.
८. माझ्या वर्गात चाळीस विद्यार्थी आहेत.
मेरी कक्षा में चालिस छात्र हैं ।
There are forty students in my class.

## पञ्चमः विभागः – भाषाभ्यासः । ( २० )

**प्र. ५ अ) तालिकापूर्तिं कुरुत ।** ⑧

**१. नामतालिकां पूरयत । ( ६ तः ४ )** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वणिजम् | ........ | ........ | द्वितीया |
| ........ | शशिभ्याम् | ........ | पञ्चमी |
| ........ | ........ | मातृभिः | तृतीया |

**२. सर्वनामतालिकां पूरयत । ( ६ तः ४ )** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्याः | ......./एनयोः | ........ | षष्ठी |
| ........ | कौ | ........ | द्वितीया |
| ........ | ........ | एतेभ्यः | चतुर्थी |

**३. क्रियापदतालिकां पूरयत । ( ६ तः ४ )** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | लकारः |
|---|---|---|---|---|
| ........ | ........ | अभवन् | प्रथमः | लङ् |
| ........ | धारयेथाम् | ........ | मध्यमः | लोट् |
| नश्येयम् | ........ | ........ | उत्तमः | विधिलिङ् |

**४. धातुसाधित–विशेषण–तालिकां पूरयत । ( ६ तः ४ )** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ / शानच् |
|---|---|---|---|---|
| रम् ( १आ.प.) | रतः | ........ | रन्तव्यः | ........ |
| प्र + विश् (६ उ.प.) | ........ | प्रविष्टवान् | ........ | प्रविशन् |
| गम्–गच्छ् ( १ प.प.) | ........ | ........ | गन्तव्यः | गच्छन् |

**आ) निर्दिष्टाः कृतीः कुरुत । ( ५ तः ४ )** (१२)

**१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत ।** ( ५ तः ३ ) ३

क) दिनस्य ............ ( ९ ) लोकयानम् आगच्छति । ( आवृत्तिवाचकम् )

ख) ............ (२) भवने योगेशः निवसति । ( क्रमवाचकम् )

ग)अस्माकं पाठ्यपुस्तके ............ (१५ ) पाठाः सन्ति । (सङ्ख्यावाचकम् )

घ)शङ्करस्य ............ (३) नेत्राणि सन्ति । (सङ्ख्यावाचकम् )

च)शङ्कराचार्यस्य जन्म ख्रिस्ताब्दस्य ............ ( ८ ) शतके अभवत् । (क्रमवाचकम्)

**२) समासानां तालिकापूर्तिं कुरुत । ( ५ तः ३)** ३

| | **समस्तपदम्** | **समास विग्रहः** | **समासनाम** |
|---|---|---|---|
| क) | चिन्ताकुलः | चिन्तया आकुलः । | ........ |
| ख) | सूक्ष्मकणाः | ........ | कर्मधारयः । |
| ग) | ........ | उद्यानं पालयति इति । | उपपद तत्पुरुषः । |
| घ) | लगुडहस्तः | ........ | बहुव्रीहिः । |
| च) | ........ | लोकेषु प्रियः । | सप्तमी तत्पुरुषः । |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । ( ५ तः ३ )** ३

क) लक्ष्मीः = ............ । ख) मैत्री × ............ ।

ग) पिता = ............ । घ) क्रेतुम् × ............ ।

च) उत्कण्ठा = ............ ।

**४) सूचनानुसारं कृतीः कुरुत । ( ५ तः ३ )** ३

क) प्रेक्षकाः मां निर्घृणं ताडितवन्तः । ( वाच्यपरिवर्तनं कुरुत । )

ख) प्रश्नं श्रुत्वा सर्वे आश्चर्यचकिताः अभवन् । ( त्वान्तं निष्कासयत । )

ग) वयं कार्यरताः स्याम । ( लोट् लकारे परिवर्तयत ।)

घ) यानं चलति । (चालकः ) ( णिजन्तं कुरुत ।)

च) अपि भवती संस्कृतं पाठयति ? ( 'भवती' स्थाने 'त्वं' योजयत । )

**५) वाक्यं शुद्धं कुरुत । ( ५ तः ३ )** ३

क) अलं विवादात् ।

ख) अहं कथायाः पुस्तकं पठति ।

ग) लताः पुष्पैः विभूषितः सन्ति ।

घ) बालाः कृते शिक्षणम् आवश्यकम् ।

च) श्वः युवां मम महाविद्यालयम् आगच्छ ।

## षष्ठः विभागः – अपठितम् । ( ८ )

**प्र. ६ अ) गद्यांशं पठित्वा कृतीः कुरुत ।( ६ तः ४)** ④

> आम्रवृक्षः जनानां प्रियः वृक्षः । आम्रवृक्षस्य छाया निबिडा भवति । एषः वृक्षः विशालः विस्तृतः च अस्ति । जनेभ्यः आम्रफलानि रोचन्ते । ग्रीष्मे आम्रफलानि अपक्वानि भवन्ति । आम्रवृक्षस्य मञ्जरीः दृष्ट्वा कोकिलः तुष्यति । आम्रवृक्षस्य काष्ठं वस्तुनिर्माणार्थं अतीव उपयुक्तं विद्यते । आम्रवृक्षः मङ्गलकरः इति जनाः मन्यन्ते । अतः एतस्य पत्राणि मङ्गलसमये उपयुज्यन्ते ।

**१. पूर्णवाक्येन उत्तरत ।** १

कोकिलः किं दृष्ट्वा तुष्यति ?

**२. प्रातिपदिकं लिखत ।** १

क) पत्राणि ख) एतस्य

**३. वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।** १

आम्रवृक्षः अमङ्गलकरः इति जनाः मन्यन्ते ।

**४. माध्यमभाषया सरलार्थं लिखत ।** जनेभ्यः आम्रफलानि रोचन्ते । १

**५. गद्यांशतः १ अव्ययं चित्वा लिखत ।** १

**६. कारकपरिचयं कुरुत ।** ग्रीष्मे = ............ । १

**आ) १) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

> काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
> देशः अयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ।।


**क) एकवाक्येन उत्तरत ।** (२ तः १) १

१. कः काले वर्षतु ? २. अयं देशः कीदृशः भवतु ?

**ख) समानार्थकशब्दं लिखत ।** पृथिवी = ............ । १

**२) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।** २

> तक्षकस्य विषं दन्ते , मक्षिकायाः मुखे विषम् ।
> वृश्चिकस्य विषं पुच्छे , सर्वाङ्गे दुर्जनस्य तत् ।।




***